श्री

(1)

॥ श्रीकृष्णेन्द्र सिंह माहाराज यांचे पुस्तक अ ॥
॥ से कुणि घेऊन नये त्यांना तो या स्तव कुणि घेऊ नये

॥ अथ अमर [illegible] प्रथम कांड ॥

॥ प्रा[illegible]॥ ॥ ॥ ॥ ॥

॥ हि पोथि बाळा[illegible] चंद्र अष्टपुत्रेयां ॥
॥ चि असे कुणि घेऊ नये जो घेइल त्यास ॥
॥ माझि श्रीकृष्णेन्द्र सिंह फार पिडा दिलि ॥
॥ लक्का कि यांचि पोथि अहे या स्तव कि ल्हके ॥

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai "

(२)

१ श्रीगणेशायनमः॥ यस्यज्ञानदयासिंधोरगाधस्यानघागुणाः॥ सेव्यतामक्ष
योधीराः सश्रियेचामृतायच॥१॥ समाहृत्यान्यतंत्राणि संक्षिप्तैः प्रतिसंस्कृतैः॥
संपूर्णमुच्यतेवर्गैर्नामलिंगानुशासनं॥२॥ प्रायशोरूपभेदेनसाहचर्यो
च्चकुत्रचित्॥ स्त्रीपुंनपुंसकंज्ञेयं तद्विशेषविधेःक्वचित्॥३॥ भेदा
ख्यानायनद्वंद्वोनैकशेषोनसंकरः॥ कृतोत्रभिन्नलिंगानामनुक्ता
नांक्रमादृते॥४॥ त्रिलिंग्यांत्रिष्वितिपदंमिथुनेतुद्वयोरिति॥
निषिद्धलिंगंशेषार्थंत्वंताथादिनपूर्वभाक्॥५॥ स्वरव्यये
॥ स्वर्गनाकत्रिदिवत्रिदशालयः॥

Rajawade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai. Joint project of

(3)

सुरलोकोद्योदिवौद्वेस्त्रियांक्लीबेत्रिविष्टपं॥६॥ अमरानिर्जरादेवास्त्रिदशादि
बुधाःसुराः॥ सुपर्वाणःसुमनसस्त्रिदिवेशादिवौकसः॥
॥७॥ आदितेयादिविषदोलेखाअदितिनंदनाः॥ आदित्याऋभवोस्व
प्नाअमर्त्याअमृतांधसः॥८॥ बर्हिर्मुखाःक्रतुभुजोगीर्वाणादानवारयः॥ वृं
दारकादैवतानिपुंसिवादेवताःस्त्रियां॥९॥ आदित्याविश्ववसवस्तुषिता
भास्वरानिलाः॥ महाराजिकसाध्याश्चरुद्राश्चगणदेवताः॥१०॥ विद्याध
राप्सरोयक्षरक्षोगंधर्वकिंनराः॥ पिशाचोगुह्यकःसिद्धोभूतोमीदे
वयोनयः॥११॥ असुरादैत्यदैतेयादनुजेंद्रारिदानवाः॥ शुक्रशिष्यादि

का३
(५)

।२॥ तिसुताः सर्वदेवाः सुरद्विषः १२ सर्वज्ञः सुगतो बुद्धो धर्मराजः स्तथागतः।

समंतभद्रो भगवान्मारजिल्लोकजिज्जिनः १३ षडभिज्ञो दशबलो

द्वयवादी विनायकः। मुनींद्रः श्रीघनः शास्तामुनिः शाक्यमुनिः स्तु

यः १४ स शाक्यसिंहः सर्वार्थः सिद्धः सौद्धोदनिः श्चसः। गौतमश्चा

त४ र्कबंधुश्च मायादेवीसुतश्च सः। ब्रह्मात्मभूः सुरज्येष्ठ परमेष्ठीपिता

मूं महः। हिरंण्यगर्भो लोकेशः स्वयंभूश्चतुराननः १६ धाताब्जयोनिर्द्रुहिणो वि

रंचिः कमलासनः स्रष्टाप्रजापतिर्वेधाविधाता विश्वसृड्विधिः १७ विष्णुर्ना ॥२

रायणः कृष्णो वैकुंठो विष्टरश्रवाः दामोदरो हृषीकेशः केशवो माधवः स्व

ह

माधव

(5)

रः ॥१८ दैत्यारिः पुंडरीकाक्षो गोविंदो गरुडध्वजः ॥ पीतांबरोच्युतः शार्ङ्गी
विष्वक्सेनो जनार्दनः ॥१९ ~~उपेंद्र इंद्रावरजश्चक्रपाणिश्चतुर्भुजः पद्मनाभो~~
~~मधुरिपुर्वासुदेवस्त्रिविक्रमः २०~~ उपेंद्र इंद्रावरजश्चक्रपाणिश्चतुर्भुजः
पद्मनाभो मधुरिपुर्वासुदेवस्त्रिविक्रमः ॥ २० देवकीनंदनः शौरिः श्रीपतिः
पुरुषोत्तमः वनमाली बलिध्वंसी कंसारातिरधोक्षजः ॥ २१ विश्वंभरः कै
टभजिद्विधुः श्रीवत्सलांछनः ॥ वसुदेवोस्य जनकः स एवानकदुंदुभिः ॥२२
बलभद्रः प्रलंबघ्नो बलदेवोच्युताग्रजः रेवतीरमणो रामः कामपा
लो हलायुधः ॥२३ नीलांबरो रौहिणेयः स्तालांको मुसली हली ॥ सं

३ पुराणपुरुषो यज्ञपुरुषो नरकांतकः ... शायी विश्वरूपो मुकुंदो मुर

जल

...कोश (६) ४ अरविंद मरुरो कंचचूतंचनवमल्लिका॥ च

३

॥२४॥ मदनोमन्मथोमारः प्रद्युम्नोमीन
कर्षणः सीरपाणिः कालिंदीभेदनोबलः
केतनः॥ कंदर्पोदर्पकोनंगः कामः पंचशरःस्मरः॥२५॥ शंबरारिर्मनसिजः कु
सुमेषुरनन्यजः॥ पुष्पधन्वारतिपतिर्मकरध्वजआत्मभूः॥२६॥ ब्रह्मसूर्वि
श्वकेतुः स्यादनिरुद्धउषापतिः॥ लक्ष्मीः पद्मालयापद्माकमलाश्रीर्हरिप्रि
[illegible] या॥ शंखो
पा॥२७॥ [illegible]
लक्ष्मीपतेःपांचजन्यश्चक्रंसुदर्शनं॥ ध्व॥ कौमोदकीगदाखड्गोनंदकः
कौस्तुभोमणिः॥ गरुत्मान्गरुडःस्तार्क्ष्योवैनतेयःखगेश्वरः॥२९॥ नागां
तकोविष्णुरथःसुपर्णः पंनगाशनः॥ शंभुरीशः पशुपतिःशिवः शूलि

...रालोक
...माक्षी
...तनयार
...४

(५)

महेश्वरः ॥ ईश्वरः सर्व ईशानः शंकरः श्चंद्रशेखरः ॥ ३१ ॥ भूतेशः खंड
परशुगीरीशो गिरिशो मृडः ॥ मृत्युंजयः कृत्तिवासाः
पिनाकी प्रमथाधिपः ॥ ३२ ॥ उग्रः कपर्दी श्रीकंठः शितिकंठः कपाल
भृत् ॥ वामदेवो महादेवो विरूपाक्षस्त्रिलोचनः ॥ ३३ ॥ कृशानुरेताः सर्व
ज्ञो धूर्जटिर्नीललोहितः ॥ हरः स्मरहरो भर्गस्त्र्यंबकस्त्रिपुरांतकः ॥
॥ ३३ गंगाधरोंधकरिपुः क्रतुध्वंसी वृषध्वजः ॥ व्योमकेशो भवो भी
मः स्थाणुं रुद्र उमापतिः ॥ ३४ ॥ कपर्दोस्य जटाजूटः पिनाको
जगवंधनुः ॥ प्रमथास्युः पारिषदा ब्राह्मीत्याद्यास्तु मातरः ॥ ३५ ॥

A joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

अमरकोश

...नामातृश्च...चर्चिकामारी...तथा। वाराही... चामुंडा...

ऐश्वर्यं च वशित्वं च प्राकाम्यं भूतिरेव च ॥१॥ अणिमा महिमा चैव लघिमा गरिमा तथा १

॥ ८ ॥ विभूतिर्भूतिरैश्वर्यमणिमादिकमष्टधा ॥ उमा कात्यायनी गौरी काली हैमवतीश्वरी ॥३६॥ शिवा भवानी रुद्राणी शर्वाणी सर्वमंगला ॥ अपर्णा पार्वती दुर्गा मृडानी चंडिकांबिका ॥३७॥ विनायको विघ्नराजद्वैमातुरगणाधिपाः ॥ अप्येकदंतहेरंबलंबोदरगजाननाः ॥३८॥ कार्तिकेयो महासेनः शरजन्मा षडाननः ॥ पार्वतीनंदनः स्कंधः सेनानीरग्निभूर्गुहः ॥३९॥ बाहुलेयस्तारकजिद्विशाखः शिखिवाहनः ॥ षाण्मातुरः शक्तिधरः कुमारः क्रौंचदारणः ॥४०॥ इंद्रो मरुत्वान्मघवा बिडौजाः पाकशासनः वृद्धश्रवाः सुनासीरः पुरुहूतः पुरंदरः ॥४१॥ जिष्णुर्लेखर्षभः शक्र

(8)

३ आर्या दाक्षायणी चैव गिरिजा मेनकात्मजा ॥ चर्ममोटी तु चामुंडा चर्ममुंडा तु चर्चिका ॥ भृंगी भृंगीरिटी नंदी नांदि नो नंदिकेश्वरः ॥३

(9)

क्रःशतमन्युर्दिवस्पतिः सुत्रामा गोत्रभिद्वज्री वासवो वृत्रहा वृषा ॥४२॥ वास्तो
२२ ष्पतिः सुरपतिर्बलारातिः शचीपतिः ॥ जंभभेदी हरिहयः स्वाराण्नमुचिसू
भ्र दनः ॥ संक्रंदनो दुश्च्यवनस्तुराषाण्मेघवाहनः ॥ आखंडलः सहस्राक्ष ऋभु
क्षास्तस्य तु प्रिया ॥४४॥ पुलोमजा शचींद्राणी नगरी त्वमरावती हय उच्चैःश्र
वाः सूतो मातलिर्नंदनं वनं ॥४५॥ स्यात्प्रासादो वैजयंतो जयंतः पाकशासनिः ॥
व ऐरावतोऽभ्रमातंगैरावणाभ्रमुवल्लभाः ॥४६॥ ह्रादिनी वज्रमस्त्री स्यात्कुलि
शं भिदुरं पविः ॥ शतकोटिः स्वरुः शंबो दंभोलिरशनिर्द्वयोः ॥४७॥ व्योमया
नं विमानोऽस्त्री नारदाद्याः सुरर्षयः ॥ स्यात्सुधर्मा देवसभा पीयूषममृतं
सुधा ॥४८॥ मंदाकिनी वियद्गंगा स्वर्णदी सुरदीर्घिका ॥ मेरुः सुमेरुर्हेमा

१० को

४ घृताचीमेनकारंभाउर्वशीचतिलोत्तमा सुकेशीमंजुघोषाद्याः कथ्यंतेप्सरसोबुधैः

५ द्रीरत्नसानुः सुरालयः ४८ पंचैतेदेवतरवोमंदारःपारिजातकः संतानः कल्पवृ
क्षश्चपुंसिवाहरिचंदनं ॥ ४९ सनत्कुमारोवैधात्रः स्वर्वैद्यावश्विनीसुतौ ना
सत्यावश्विनौदस्रावाश्विनेयौचतावुभौ ॥ ५१ स्त्रीयांबहुष्वप्सरसः स्वर्वेश्यार्वउ॰ स्या
(१०) शीमुखाः हाहाहूहूश्चैवमाद्यागंधर्वास्त्रिदिवौकसां ५२ अग्निर्वैश्वानरोव
र्हिर्वीतिहोत्रोधनंजयः कृपीटयोनिर्ज्वलनोजातवेदास्तनूनपात् ५३ ब
र्हिःशुष्माकृष्णवर्त्माशोचिष्केशउषर्बुधः आश्रयाशोबृहद्भानुःकृशानुः शो २
पावकोनलः ५४ रोहिताश्वोवायुसखः शिखावानाशुशुक्षणिः हि
रण्यरेताहुतभुग्दहनोहव्यवाहनः ५५ सप्तार्चिर्दमुनाः शुक्रश्चित्रभा ५

Rajwade Sanshodhan Mandal, Dhule and the Yeshwantrao Chavan ... Mumbai

(11)

दामिनी विद्युचंचला चपला अपि ॥ स्फूर्जथुर्वज्रनिर्घोषो मेघज्योति
रिरंमदः ॥९॥ इंद्रायुधं शक्रधनुस्तदेव ऋजुरोहितं ॥ वृष्टिर्वर्षं तद्विघातेव
ग्रहावग्रहौ समौ ॥१०॥ धारासंपात आसारः शीकरोंबुकणाः स्मृ
ताः ॥ वर्षोपलस्तु करका मेघछन्नेह्नि दुर्दिनं ॥११॥ अंतर्धा व्यवधा
पुंसि त्वंतर्धिरपवारणं ॥ अपिधानतिरोधानपिधानाछादनानि च
॥१२॥ हिमांशुश्चंद्रमाश्चंद्र इंदुः कुमुदबांधवः ॥ विधुः सुधांशुः शुभ्रांशुरोष
धीशो निशापति ॥१३॥ अब्जो जैवात्रिकः सोमो ग्लौर्मृगांकः

म चंद्र

संपादित — Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

को० ७

१२

लु

कलानिधिः ॥ द्विजराजः शशधरो नक्षत्रेशः क्षपाकरः ॥ [redacted]
[redacted] कला तु षोडशो भागो बिंबोऽस्त्री मंडलं त्रिषु १५ ॥
भित्तं शकलखंडे वा पुंस्यर्धोऽर्धं समेंऽशके ॥ चंद्रिका कौमुदी ज्योत्स्ना
प्रसादस्तु प्रसन्नता ॥ १६ कलंकांकौ लांछनं च चिह्नं लक्ष्म च लक्ष्म
पं ॥ १७ सुषमा परमा शोभा शोभा कांतिर्द्युतिश्छविः ॥ अवश्यायस्तु
नीहारस्तुषारस्तुहिनं हिमं ॥ १८ ॥ प्रालेयं मिहिका चाथ हिमानी
हिमसंहतिः ॥ शीतं गुणे तद्वदर्थाः सुषीमः सुषिरो जडः ॥ १९ ॥ तु

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(13)

षारः शीतलः शीतो हिमः सत्यान्यलिंगकाः॥ ध्रुव औत्तानपादिस्या
दगस्त्यः कुंभसंभवः॥२०॥ मैत्रावरुणिरस्यैव लोपामुद्रा सधर्मि
णी॥ नक्षत्रमृक्षं भं तारा तारकाप्युडु वा स्त्रियां॥२१॥ दाक्षायण्याश्वि
नीत्यादि तारा अश्वयुगश्विनी॥ राधा विशाखा पुष्ये तु सिध्यतिष्यौ
श्रविष्ठया॥२२॥ समा धनिष्ठाः स्युः प्रोष्ठपदा भाद्रपदाः स्त्रियां॥ मृगशी
र्षं मृगशिरस्तस्मिन्नेवाग्रहायणी॥२३॥ इल्वलास्तच्छिरोदेशे ता
रका निवसंति याः॥ बृहस्पतिः सुराचार्यो गीष्पतिर्धिषणो

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

७ को० केतुःशिखिकविज्ञयोवरूणोमरूततातमजः
पि
गुरुः॥२४॥जीवआंगिरसोवाचस्पतिःश्चित्रशिखंडिजः॥शुक्रोदैत्य
१॥ गुरुकाव्योउशनाभार्गवःकविः॥२५॥अंगारकःकुजोभौमोलोहितां लो२
(15) गोमहीसुतः॥रौहिणेयोबुधःसौम्यःसमौसौरिशनैश्चरौ॥२६॥तमः
स्तुराहुःस्वर्भानुःसैंहिकेयोविधुंतुदः॥सप्तर्षयोमरीच्यत्रिमुखाश्चि त्रि४
त्रशिखंडिनः॥२७॥राशीनामुदयोलग्नंतेतुमेषवृषादयः॥सुरसूर्या ना९
र्यमादित्यद्वादशात्मदिवाकराः॥२८॥भास्कराहस्करब्रध्नप्रभाकरवि रा६
मा भाकराः॥भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः॥२९॥विकर्तन।

कर्मसाक्षिजगत्चक्षुः लोकबंधुस्त्रैतनुप्रद्योतनो दिनमणि चांशु(मालिनी) पतिः

र्कमार्तंडमिहिरारुणपूषणः॥ द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोच

(15) नः॥ ३० ॥ विभावसुर्ग्रहपतिः त्विषांपतिरहर्पतिः॥ भानुर्हंसः सहस्रांशुः ध्वा

स्तपनः सविता रविः॥ माठरः पिंगलो दंडः चंडांशोः पारिपार्श्विकाः॥ सू

रसूतोरुणोनूरुः काश्यपिर्गरुडाग्रजः॥ ३२ ॥ परिवेषस्तु परिधिरुपसू

र्यकमंडले॥ किरणोस्रमयूखांशुगभस्तिघृणिरश्मयः॥ ३३ ॥ भानुः

सार करोमरीचिः स्त्रीपुंसयोर्दीधितिः स्त्रियां॥ स्युः प्रभारुग्रुचिस्त्विड्भा

भाश्छविद्युतिदीप्तयः॥ ३४ ॥ रोचिः शोचिरुभे क्लीबे प्रकाशोद्योतआ

पा

अ॰को॰

१

(16)

तपः कोष्णं कवोष्णं मंदोष्णं कदुष्णं त्रिषु तद्वति ३५ तिग्मं तीक्ष्णं खरं तद्व
न्मृगतृष्णा मरीचिका ॥ ॥ इती दिग्वर्गः ॥ कालो दिष्टोप्यनेहापि समयो
प्यथ पक्षतिः ॥ प्रतिपद्द्वे इमे स्त्रीलिंगे तदाद्यास्तिथयो द्वयोः ॥ १ घस्रो दिनाह
नी वा तु क्लीबे दिवसवासरौ ॥ प्रत्यूषोहर्मुखं कल्यमुषः प्रत्युषसी अपि २
प्रभातं च दिनांते तु सायं संध्या पितृप्रसूः ॥ प्राह्णापराह्णमध्याह्नास्त्रि
संध्यमथ शर्वरी ३ निशा निशीथनी रात्री त्रियामा क्षणदा क्षपा ॥ विभा
वरीतमस्विन्यौ रजनी यामिनी तमी ४ तमिस्रा तामसी रात्रिर्ज्यौ
त्स्नी चंद्रिकयान्विता ॥ आगामिवर्त्तमानाहर्युक्तायां निशि पक्षिणी ५ ॥

(१७)

गणरात्रं निशा बह्व्यः प्रदोषो रजनीमुखं अर्धरात्रनिशीथौ द्वौ द्वौ यामप्र
हरौ समौ ॥ ६ ॥ सपर्वसंधिः प्रतिपत्पंचदश्योर्यदंतरं पक्षांतौ पंचदश्यौ
द्वे पौर्णमासी तु पूर्णिमा ॥ ७ ॥ ~~सपर्वसंधिप्रतिपत्पंचदश्योर्यदंतरं~~ ८
कलाहीने सानुमतिः पूर्णे राका निशाकरे अमावास्या त्वमावस्या द
र्शः सूर्येंदुसंगमः ॥ ८ ॥ सा दृष्टेंदुः सिनीवाली सा नष्टेंदुकला कुहूः ॥ उपरागो
ग्रहो राहुग्रस्ते त्विंदौ च पूष्णि च ॥ ९ ॥ सोपप्लवोपरक्तौ द्वावग्न्युत्पात उपा
हितः ॥ एकयोक्त्या पुष्पवंतौ दिवाकरनिशाकरौ ॥ १० ॥ अष्टादश निमेषा
स्तु काष्ठा त्रिंशत्तु ताः कलाः ॥ तास्तु त्रिंशत्क्षणस्ते तु मुहूर्तो द्वादशास्त्रि

Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

अ० को०

त्रि २

१९ यां ॥११ ते तु त्रिंशदहोरात्रः पक्षस्ते दश पंच च ॥ पक्षौ पूर्वापरौ शुक्लकृष्णौ मा
मा २ सस्तु तावुभौ ॥१३ द्वौ द्वौ मार्गादिमासौ स्यादृतुस्तैरयनं त्रिभिः ॥ अयने द्वे गति घा २
रुदग्दक्षिणार्कस्य वत्सरः ॥१४ समरात्रिंदिवे काले विषुवद्विषुवं च तत् ॥
(१४) मार्गशीर्षे सहा मार्ग आग्रहायणिकश्च सः ॥१५ पौषे तैषसहस्यौ द्वौ त
पा माघेथ फाल्गुने ॥ स्यात्तपस्यः फाल्गुनिकः स्याच्चैत्रे चैत्रिको म
धुः ॥१६ वैशाखे माधवो राधो ज्येष्ठे शुक्रः शुचिस्त्वयं ॥ आषाढे श्राव
ने तु स्यान्नभाः श्रावणिकश्च सः ॥ स्युर्नभस्यप्रौष्ठपदभाद्रभाद्रपदाः समाः ॥
स्यादाश्विन इषोप्याश्वयुजोपि स्यात्तु कार्तिके ॥१७ बाहुलोर्जौ कार्ति १९

ने

(19)

क्विकौहेमंतः शिशिरोस्त्रियां वसंते पुष्पसमयः सुरभिः ग्रीष्मउष्मकः १८ निदाघ
उष्णोपगमउष्णउष्मागमस्तपः स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा अथ शरत्
स्त्रियां १९ षडमी ऋतवः पुंसि मार्गादीनां युगैः क्रमात् संवत्सरो वत्सरोब्दो
हायनोस्त्री शरत्समाः २० मासेन स्यादहोरात्रः पैत्रो वर्षेण दैवतः दैवे यु
गसहस्रे द्वे ब्राह्मः कल्पौ तु तौ नृणां २१ मन्वंतरं तु दिव्यानामेक नांयुगा
(19) सप्ततिः संवर्तः प्रलयः कल्पः क्षयः कल्पांत इत्यपि २२ अस्त्री पंकं पुमा
न् पाप्मा पापं किल्बिषं कल्मषं कलुषं वृजिनैनो घमंहो दुरितदुष्कृ
तं २३ स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः मुत्प्रीतिः प्रमदो ह

र्षः प्रमोदामोदसंमदाः ॥ २४ ॥ स्यादानंदथुरानंदः शर्मशातसुखानि च ॥ श्व
श्रेयसं शिवं भद्रं कल्याणं मंगलं शुभं ॥ २५ ॥ भावुकं भविकं भव्यं कुशलं क्षे
ममस्त्रियां शस्तं चाथ त्रिषु द्रव्ये पापं पुण्यं सुखादि च ॥ २६ ॥ मतल्लिकाम
चर्चिका प्रकांडमुद्धतल्लजौ ॥ प्रशस्तवाचकान्यमून्ययः शुभावहो
विधिः ॥ २७ ॥ दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः ॥ हेतुर्ना कारणं
बीजं निदानं त्वादिकारणं ॥ २८ ॥ क्षेत्रज्ञ आत्मा पुरुषः प्रधानं प्रकृतिः
स्त्रियां ॥ विशेषः कालिकावस्था गुणाः सत्वं रजस्तमः ॥ २९ ॥ जनुर्जन
नजन्मानी जनिरुत्पत्तिरुद्भवः ॥ प्राणी तु चेतनो जन्मी जंतुजन्युशरीरी

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com